National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(58): 228-230
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Giridhari Panda**
Associate Professor,
Dept. of Sanskrit,
Midanapore College (Autonomous)
West Bengal

**Bapi Sahoo**
M.A., WB SET, NET & JRF,
Research Scholar, Dept. of Sanskrit,
Midanapore College (Autonomous)
West Bengal

**Correspondence:**
**Bapi Sahoo**
M.A., WB SET, NET & JRF,
Research Scholar, Dept. of Sanskrit,
Midanapore College (Autonomous)
West Bengal

# ‘प्राग्रीश्वरान्निपाताः’ इति सूत्रे रीश्वरशब्दविमर्शः

**Dr. Giridhari Panda, Bapi Sahoo**

**कूटशब्दाः (Key Words) -** प्राग्रीश्वरान्निपाताः, अधिकारः, निपातसंज्ञा, रीश्वरात्, वीश्वरः, ईश्वरशब्दः

**शोधसारः (Abstract) -**

‘निपतनं निपत्यते इति निपातः’निपातः इत्यर्थे नि-पूर्वकात् पत्-गतौ इत्यस्मात् धातोः ‘भावे’[1] भावे (पा.सू.-3.3.18) इति सूत्रेण घञ्-प्रत्यये ‘अत उपधायाः’[2]उपधायाः इति सूत्रेण उपधावृद्धौ निपातशब्दः निष्पद्यते। भगवान् पाणिनिः तदीयायाम् अष्टाध्याय्यां निपातस्य सामान्यलक्षणं प्रदर्शयति ‘चादयोऽसत्त्वे’[3] चादयोऽसत्त्वे इति सूत्रमाध्यमेन। असत्त्वे नाम द्रव्यभिन्नार्थे चादिगणीयाः शब्दाः निपातसंज्ञकाः भवन्ति। भट्टोजीदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां उक्तं यत् – “अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युरि”[4]ति।स्युरिति। अष्टाध्याय्यां निपातसंज्ञाविधायकानि एकचत्वारिंशत् सूत्राणि निर्दिष्टानि सन्ति। तेषु सूत्रेषु ‘प्राग्रीश्वरान्निपाता’[5] प्राग्रीश्वरान्निपाता इति सूत्रं अन्यतमम्। सूत्रमिदं निपाताधिकारं सूचयति। इतः प्रारभ्य ‘अधिरीश्वरे’[6] अधिरीश्वरे इति सूत्रं यावत् निर्दिष्टाः शब्दाः निपातसंज्ञकाः भवेयुः। अस्मिन् सूत्रे रेफ-युक्तस्य ईश्वरशब्दस्य (रीश्वरशब्दस्य) व्याख्यानावसरे वैयाकरणैः यानि मतानि प्रदत्तानि तान्येव आकल्य मदीयः शोधप्रबन्धः समासेन अत्र समुपस्थाप्यते।

‘प्राग्रीश्वरान्निपाताः’प्राग्रीश्वरान्निपाता इति संज्ञासूत्रम्। प्रकृतसूत्रेण निपातसंज्ञायाः अधिकारः प्रारभ्यते। ‘अधिरीश्वरे’ इति अधिरीश्वरे इति सूत्रं यावदयम् अधिकारः प्रवर्तते। दीक्षितेनापि वृत्तौ उच्यते-‘इत्यधिकृत्य’।-इत्यधिकृत्य। सूत्रेऽस्मिन् पदत्रयमस्ति- प्राक् रीश्वरात् निपाताः च। इतः प्रभृति रीश्वरात् प्राक् यावन्तः शब्दाः सन्ति तेषां शब्दाः सन्ति तेषां शब्दानां निपातसंज्ञा भवतीति सूत्रार्थः। यदुक्तं बालमनोरमाटीकायाम् – “इतः प्रभृति अधिरीश्वरे इति एतत्पादीयोपरितनसूत्रे रीश्वरशब्दात् प्राक् निपातसंज्ञकाः प्रत्येतव्या इत्यर्थः”[7]त्यर्थः।

सूत्रेऽस्मिन् प्रयुक्तं रीश्वरशब्दं नीत्वा विविधाः आशङ्काः मनसि समुपजायन्ते। तासाम् आशङ्कानां समाधानं समीक्षणञ्च शास्त्रकाराणां व्याख्यानमादायैव संसाधिते। यथा- अल्पाक्षरविशिष्टं प्रागीश्वरान्निपाताः सूत्रेऽस्मिन् प्रयुक्तं रीश्वरशब्दं नीत्वा विविधाः आशङ्काः मनसि समुपजायन्ते। तासाम् आशङ्कानां समाधानं समीक्षणञ्च शास्त्रकाराणां व्याख्यानमादायैव संसाधिते। यथा-अल्पाक्षरविशिष्टस्य ‘प्रागीश्वरान्निपाताः’ इति सूत्रस्वरूपस्य ग्रहणे इष्टसिद्धिः भवतीति चेत्, पुनः रेफविशिष्टस्य ईश्वरशब्दस्य ग्रहणं किमर्थम्? तन्न रीश्वराद्वीश्वरान्मा भूत्। तात्पर्यमिदं यत् सूत्रे रेफयुक्तस्य ईश्वरस्य ग्रहणाभावे सूत्रस्यास्य अधिकारः ‘ईश्वरे तोसुन्कसुनौ’[8] इति सूत्रं यावत् प्रवर्तितुमर्हति। वस्तुतस्तु अष्टाध्याय्यां सूत्रपाठे ‘शकिणमुल्कमुलौ’[9] ‘ईश्वरे तोसुन्कसुनौ’ (पा.सू.-3.4.13) च इति सूत्रद्वयस्य स्वरूपं संहितापाठदशायां “शकिणमुल्कमुलावीश्वरे तोसुन्कसुनौ” इत्याकारेण

समुपलभ्यते। यदि सूत्रेऽस्मिन् रेफसहितस्य ईश्वरस्य ग्रहणं न भवति, तर्हि "शकिणमुल्कमुलावीश्वरे तोसुन्कसुनौ" इति यावत् अस्य अधिकारः प्रवर्तते। येन अनिष्टार्थापत्तिः भवेत्। अतः रीश्वरशब्दः वीश्वर इति न स्यादिति दर्शयितुं सूत्रेऽस्मिन् रेफसहितस्य ईश्वरस्य ग्रहणं भवति। किञ्च समग्रायाम् अष्टाध्याय्यां केवलं अधिरीश्वरे इति सूत्रे रीश्वरशब्दस्य प्रयोगः दृश्यते। अतः सूत्रे रेफसहितस्य ईश्वरशब्दस्य ग्रहणं सार्थकत्वं भजते। यदुक्तं बालमनोरमाटीकायाम्- "रेफविशिष्टग्रहणं किम्? ईश्वरे तोसुन्कसुनौ इति तृतीयाध्यायस्थस्यावधित्वं मा भूत्। यदि तु प्रथमातिक्रमेण कारणाभावात् अधिरीश्वर इत्यस्येवावधित्वम्, तदा सरेफग्रहणं स्पटार्थम्"[10]।

उक्तं च तत्त्ववोधिनीकारेण – "रेफविशिष्टग्रहणं किम्? ईश्वरे तोसुन्कसुनौ इत्यस्य व्याप्तिन्यायेनावधित्वं मा भूत्। यदि तु प्रत्यासत्त्यैव अधिरीश्वरे इत्यस्यावधित्वसिद्धिरित्युच्यते, तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्तु"[11]।

उक्तं च दीक्षितेन शब्दकौस्तुभे- "रेफविशिष्टग्रहणं किम्? ईश्वरे तोसुन्कसुनौ इत्यस्य व्याप्तिन्यायेनावधित्वं मा भूत्"[12]।

महाभाष्यकारेण पतञ्जलिना अपि उच्यते –

"किमर्थं रेफाधिकं ईश्वरशब्दो गृह्यते ? रीश्वराद्वीश्वरान्मा भूत्। रीश्वरादित्युच्यते, वीश्वरान्मा भूदिति "शकिणमुल्कमुलावीश्वरे तोसुन्कसुनौ" इति"[13]।

पुनः आशङ्का जायते यत् भगवता पाणिनिना म-कारान्तशब्दानाम् एजन्तशब्दानाञ्च अव्ययसंज्ञार्थं 'कृन्मेजन्तः'[14] इति सूत्रं निर्दिष्टम्। सूत्रमिदम् एतत् ज्ञापयति यत् प्राग्रीश्वरान्निपाताः इति सूत्रस्य अधिकारः ईश्वरे तोसुन्कसुनौ इति सूत्रं यावत् न प्रवृत्तः भवेत्। यदि सूत्रस्यास्य अधिकारः वीश्वर इति यावत् अनुसर्यते, तर्हि म-कारान्तशब्दाः एजन्तशब्दाः प्राग्रीश्वरान्निपाताः इति सूत्रेण निपातसंज्ञां लब्ध्वा 'स्वरादिनिपातमव्ययम्'[15] इति सूत्रेण अव्ययसंज्ञां लभन्ते। तथा कृते कृन्मेजन्तः इति सूत्रं व्यर्थं भवेत्। तन्निवारणाय सूत्रे रेफसहितस्य ईश्वरशब्दस्य ग्रहणं जातम्। तथाहि उक्तं महाभाष्ये-

"नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति - अनन्तरो य इर्श्वरशब्दस्तस्य ग्रहणमिति। यदयं कृन्मेजन्तः इति कृतो मान्तस्यैजन्तस्याऽव्ययसंज्ञां शास्ति। कृन्मेजन्तः परोऽपि सः। परोऽप्येतस्मात्कृन्मान्त एजन्तश्चास्ति। तदर्थमेतत्स्यात् ॥इति"[16]।।

पुनरत्र आशङ्का समुदेति यत् - 'अव्ययीभावश्च'[17] इति सूत्रेण अव्ययभावसमासनिष्पन्नशब्दानां अव्ययसंज्ञा भवति। एतत् सूत्रं ज्ञापयति यत् प्राग्रीश्वरान्निपाताः इति सूत्रस्य अधिकारः वीश्वर इति यावत् भवितुं नार्हति। परन्तु 'अव्ययीभावः'[18] इति सूत्रं ईश्वरे तोसुन्कसुनौ इति सूत्रस्य पूर्वत्वात् प्रकृतभूतसूत्रेण अव्ययीभाव-समासनिष्पन्नाः शब्दाः निपातसंज्ञां प्राप्य स्वरादिनिपातमव्ययम् इति सूत्रेण अव्ययसंज्ञां लभन्ते। तथा कृते अव्ययीभावश्च इति सूत्रं व्यर्थं स्यात्। तन्निवारणाय प्रकृतभूतसूत्रस्य अधिकारः वीश्वर इति शब्दं यावत् न प्रवर्तते। अतः सूत्रे सरेफ-ईश्वरशब्दस्य ग्रहणं सार्थकम्। विषयोऽयं स्पष्टीकृत्य भगवता पतञ्जलिना उक्तम्-

"यत्तर्ह्यव्ययीभावस्याव्ययसंज्ञां शास्ति तज्ज्ञापयत्याचार्योऽनन्तरो य इर्श्वरशब्दस्तस्य ग्रहणमिति । समासेष्वव्ययीभावः समासस्यैतज्ज्ञापकं स्यात् - अव्ययीभाव एव समासोऽव्ययसंज्ञो भवति नाऽन्य इति"[19]॥

उक्तं च हरदत्तेन पदमञ्जर्याम्-

"अव्ययीभावस्य निपातत्वादेवाव्ययसंज्ञायाः सिद्धत्वादनर्थकं तत्स्यात्, नैतदस्ति; 'समासेष्वव्ययीभावः' तुल्यजातीयव्यावृतये नियमार्थमेतत्स्यात्, न त्वनन्तरस्य ग्रहणे ज्ञापकमित्यर्थः"[20]।

**उक्तमपि दीक्षितेन शब्दकौस्तुभे –**

"वस्तुतस्तु मास्तु रेफः प्रत्यासत्त्याभिमतसिद्धेः अव्ययीभावस्या-व्ययसंज्ञारम्भाश्च। न चासौ। समासेऽप्यव्ययीभाव एवेति नियमार्थे स्यादिति वाच्यम्, गौरवग्रस्तं व्याप्तिन्यायमाश्रित्य नियमार्थत्व-वर्णनापेक्षया प्रत्यासत्तेर्विध्यर्थतायाश्च न्याय्यत्वादिति"[21]।

पुनरस्मिन् सूत्रे किमर्थं रेफाधिक ईश्वरशब्दो गृह्यते लोकत एतत्सिद्धम, तद्यथा- आ वनान्तात् आ उदकान्तात् प्रियं पान्थमनुव्रजेदिति। य एव प्रथमो वनान्त उदकान्तश्च ततोऽनुव्रजन्ति। लौकिकं चातिवर्तते। द्वितीयं तृतीयञ्च वनान्तम् उदकान्तञ्च अनुव्रजन्ति, तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः इति भाष्यवचनात् स्पष्टीभवति। अत्र हि ईश्वरादिति नोक्त्वा रीश्वरादिति कथमुक्तमित्याशङ्क्योच्यते- आ वनान्तादा उदकान्तात्प्रियं पान्थनमनुव्रजेदिति विधाने नियमाभावाद्वितीयं तृतीयञ्च वनान्तमनुगच्छन्ति, तथा अत्रापि प्रथमेश्वरशब्दं विहाय द्वितीयपर्यन्तमनुव्रजिष्यन्तीति भाष्ये स्पष्टमुक्तम्। यदुक्तं महाभाष्ये-

"एवं तर्हि लोकत एतत्सिद्धम्। तद्यथा- लोके आ वनान्तादा उदकान्तात् प्रियं पान्थमनुव्रजेत् इति य एव प्रथमो वनान्त उदकान्तश्च ततोऽनुव्रजन्ति। लौकिकं चातिवर्तते(वा.)। द्वितीयं तृतीयं च वनान्तमुदकान्तं चानुव्रजन्ति तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः"[22]।

**उक्तं च न्यासटीकायाम्-**

"लौकिकन्यायादनन्तरस्यैवेश्वरशब्दस्य ग्रहणं भविष्यति। लोके हि `ओदकान्तं प्रियं पान्थमनुव्रजेत्` इति य एवानन्तर उदकान्तस्तमेव गत्वा तत एव बान्धवा निवर्तन्ते, न व्यवहितात्। तस्मादिहाप्यनेनैव न्यायेनानन्तरादेवेश्वरशब्दान्निपातसंज्ञा निवर्तिष्यत इत्यत आह - `लौकिकं चातिवर्ततते` इति। लौकिकमपि न्यायं लोकोऽतिक्रम्य वर्तते,

यस्मात् द्वितीयमप्यदकान्तं स्नेहात् कथाप्रसङ्गात्वा गत्वा निवर्तन्ते बान्धवाः। तदेवं रेफाधिक ईश्वरशब्द उच्चार्यते। तेन वीश्वरान्मा भूदिति स्थितमेतत्”[23]॥

**उक्तमपि पदमञ्जर्याम्-**

“एवं तर्हि लौकिकन्यायादेवानन्तरस्य ग्रहणं भविष्यति, लौकिके ह्युदकान्तात्प्रियं पान्थमनुव्रजेदिति य एवानन्तर उदकान्त ततोऽनुव्रज्य बान्धवा निवर्तन्ते तद्वदत्रापि। तत्राह - लौकिकं चातिवर्तते इति। लौकिकं न्यायं लोक एवातिवर्तते; यतो द्वितीयमप्युदकान्तं स्नोहातिशयादनुव्रज्य निवर्तन्ते तस्माद्रीश्वरा-दित्युच्यते वीश्वरान्मा भूदिति स्थितम्”[24]।

अत्र रेफविशिष्टस्य रीश्वरशब्दस्य पर्यालोचनावसरे व्याख्याकारैः ‘ओदकान्तं प्रियं पान्थमनुव्रजेत्’ इति यल्लौकिकोदाहरणं समुपस्थापितम्, तस्य विचारे एतत् गूढरहस्यं प्रकटीभूतं जायते यत् आत्मीयपरिजनाः स्वप्रियजनस्य विदायकाले जलाशयं यावत् तदनु गच्छेयुः इति एष एव नियमः विद्वद्भिः प्रतिपादितः। अयं नियमः जगत्कल्याणाय भवति। यदि आत्मीयजनाः अस्य विरुद्धाचरणं कुवन्ति, तर्हि तदनिष्टाय एव कल्पते। अतः सूत्रस्यास्य अधिकारः अधिरीश्वरे इति सूत्रं यावत् प्रवर्तते, न तु न तु 'ईश्वरे तोसुन्कसुनौ' इति यावत्। 'ईश्वरे तोसुन्कसुनौ' इति सूत्रं यावत् यदि सूत्रस्यास्य प्रवृत्तिः भवति, तर्हि अनिष्टापत्तिः भवति। तन्निवारणाय सूत्रे रेफविशिष्टः ईश्वरशब्दः पठितव्यः इति वैयाकरणानाम् अभिचिन्तनम् इति दिक्।

**ग्रन्थसन्दर्भः –**


1.अष्टाध्यायीसूत्रपाठः, पुष्पा-दीक्षितः, ज्ञानभारती पब्लिकेशन्स, दिल्ली, 20009

2.वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणान्ता), लेखकः भट्टोजी-दीक्षितः, सम्पादकौ- गिरिधरशर्मा-चतुर्वेदः परमेश्वरनन्दशर्मा च, मोतीलाल बनारसीदास, वराणसी-221001, 2010

3.वैयाकरणसिद्धान्तकौमुदी, लेखकः- भट्टोजीदीक्षितः सम्पा. श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी-221001, 2014

4.पदमञ्जरी, लेखकः- हरदत्तः, सम्पादकौ- डा. पुल्लेल-श्रीरामचन्दु-डु विठलदेवुनि -सुन्दरशर्मा च, संस्कृतपरिषत्, उस्मानियाविश्व-विद्यालयः, 1981

5.शब्दकौस्तुभः, लेखकः- भट्टोजीदीक्षितः, सम्पादकौ- विन्ध्येश्वर-प्रसाद-द्विवेदी गणपतिशास्त्री-मोकाटे च, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-221001, 2010

6. व्याकरणमहाभाष्यम्, पतञ्जलिः, सम्पा. श्री भार्गव शास्त्री जोशी, चौखम्बा विद्याभवन, वाराणसी-221001, 2014


**पादटीका-**

[1]पा.सू.-3.3.18
[2]पा.सू.-7.2.116
[3]पा.सू.-1.4.57
[4]वै.सि.कौ.पृ.34
[5]पा.सू.-1.4.56
[6]पा.सू.-1.4.97
[7]पा.सू.-1.4.56, बालमनोरमाटीका,पृ.-33
[8]पा.सू.-3.4.13
[9]पा.सू.-3.4.12
[10] पा.सू.-1.4.56, द्रष्टव्या बालमनोरमाटीका,पृ.-33
[11] तत्रैव. द्रष्टव्या तत्त्ववोधिनीटीका,पृ.-33
[12] शब्दकौस्तुभः, पृ.-140
[13] पा.सू.-1.4.56 म.भा.पृ.-280
[14] पा.सू.-1.1.39
[15] पा.सू.-1.1.37
[16] म.भा.पृ.-280
[17] पा.सू.-1.1.41
[18] पा.सू.-2.1.5
[19] म.भा.पृ.-281
[20] पा.सू.-1.4.56, द्रष्टव्या पदमञ्जरीटीका
[21] शब्दकौस्तुभः,पृ.-140
[22] म.भा.पृ.-281
[23] पा.सू.-1.4.56, द्रष्टव्या न्यासटीका
[24] पा.सू.-1.4.56, द्रष्टव्या पदमञ्जरीटीका